अजपास्तोत्र

नं० ६०[illegible]८


श्री रघुवीर पुस्तकालय
मंदर श्रीरघुनाथ
सं. ५
नं. १४०८

ॐ ऊं श्रीगणेशाय नमः अथ अजपा
स्तोत्रं लिख्यते ॐ अस्य श्री अजपापरब्र
ह्महंसगायत्रीमहामन्त्रस्य हंस ऋषिः
अव्यक्तागायत्रीच्छन्दः परमहंसोदेव
ता हंबीजं सः शक्तिः सोहं कीलकं पर
महंसप्रसादाय आधारादि षट्चक्र।
स्थितदेवतानिवेदनार्थं जपे विनियोगः
अथ न्यासः हंसां सूर्यात्मने अंगुष्ठाभ्यां
नमः हंसीं सोमात्मने तर्जनीभ्यां नमः।
हंसूं निरञ्जनात्मने मध्यमाभ्यां नमः हं
सैं निराभासात्मने अनामिकाभ्यां नमः
हंसौं अव्यक्तनिर्विकारात्मने कनिष्ठिका
भ्यां नमः ॐ हंसः अतनूसूक्ष्मप्रबोधा।
त्मने करतलकरपृष्ठाभ्यां नमः एवं हृ
दयादिन्यासः अथ ध्यानम् अग्नीषो।
ममरुद्‌द्वयं प्रणवकं विन्दुत्रिनेत्रेज्ज्वलं।
भास्वद्रुद्रमुखं शिवाङ्घ्रियुगलं पार्श्वस्थ
सूर्यानलं विद्युद्भास्करकोटिकोटिसदृशं

पद्मंतरुणवरुणगात्रंवारणास्यंत्रिनेत्रं
अभयवरदहस्तंचापपाशांकुशोद्यत् क
रयुगलमनन्यश्चिन्तयेद्द्विजराजं ११ मूला
धारमण्डपमध्येचतुर्दलपद्मस्थितायकु
ङ्कुमवर्णायपुष्टिशक्तिसहितायश्रीमहाग
णपतयेषट्शतअजपापरब्रह्मगायत्रीमं
त्रमहंनिवेदयामि गणानान्त्वागणपतिं ह
वामहेकविङ्कवीनामुपमश्रवस्तवंमं ज्येष्ठ
राजंब्रह्मणांस्पतः आनः शृण्वन्नूतिभिः सी
दसादनं १२ ॐतत्पुरुषायविद्महेवक्रतुण्डा
यधीमहि तन्नोदन्तिः प्रचोदयात् १३ पंच
पूजा बंनमः भंनमः मंनमः यंनमः रंनमः
लंनमः बंभंमंयंरंलंसंज्ञेरक्तरक्तैर्युक्तपद्मे सु
रमनुविष्टंपंकजेसन्निषण्णां अभयवरदह
स्तंकुण्डिकांताक्षमालां करचतुरमनन्यश्चिं
तयेद्विश्वयोनिं १४ स्वाधिष्ठानमण्डपमध्ये
षट्दलपद्मस्थितायसिन्दूरवर्णायसरस्व
तीसमेतायब्रह्मणेनमः षट्सहस्रअजपा
परब्रह्मगायत्रीमंत्रमहंनिवेदयामि १५ ब्रह्मा

देवानां पदवीः कवीनामृषिर्विप्राणां महि।
षो मृगाणां श्येनो गृध्राणांस्वधितिर्वनानां सो
मः पवित्रमत्येति रेभन् चतुर्मुखाय विद्म
हे सृष्टिनाथाय धीमहि तन्नो ब्रह्म प्रचोदया
त् ६ पंचपूजा डंनमः ढंनमः णंनमः तंन
मः थंनमः दंनमः धंनमः नंनमः पंनमः
फंनमः डाद्यैः फांतगतैः प्रकल्पितदलैः प
द्मासनस्थं हरिं मार्तण्डद्युतिमादिपूरुषम
हं नारायणं चिंतये हस्ताभ्योधिगदादिशं।
खमनलेपीताम्बरं कौस्तुभं श्रीवत्साङ्कितमि
न्दुनीलसदृशं ध्यायेज्जगन्मोहनं ७ मणिपू
रमंडपमध्ये दशदलपद्मस्थिताय नीलवर्णा
य लक्ष्मीसमेताय महाविष्णवे नमः षट्स
हस्रञ्जपापरब्रह्मगायत्रीमंत्रमहं निवेदया
मि तद्विष्णोः परमं पदं ७ तद्विप्रासो विपन्यवो
नारायणाय विद्महे वासुदेवाय धीमहि तन्नो
विष्णुः प्रचोदयात् २ पंचपूजा कंनमः खंन
मः गंनमः घंनमः ङंनमः चंनमः छंनमः
जंनमः झंनमः ञंनमः टंनमः ठंनमः काद्यैः

हंसंजगद्व्यापकं शब्दब्रह्ममयंहृदम्बुजा
पुटे तेजःसदाभावयेत् १ हृदयकमल
मध्येदीपवद्वेदसारं प्रणवमयमतर्क्यंयो
गिभिर्ध्यानगम्यं हरिगुरुशिवयोगंसर्व
भूतस्थमेकं सकृदपिमनसामांध्यायते
यःसमुक्तः २ हंसोगणेशोविधिरेवहंसो
सौहंसोहरिःशंभुमयोपिहंसः हंसोपिजीवो
गुरुरेवहंसस्त्वात्मापिहंसः परमात्महंसः ३
गमागमस्थंगगनातिशून्यं चिद्रूपदीपंति
मिरापहारं पश्यामितेसर्वजनान्तरस्थं न
मामिहंसंपरमात्मरूपं ४ आधारस्तुचतु
र्दलारुणरुचंवासान्तवर्णाश्रयं स्वाधिष्ठा
नयुरंमणिद्युतिनिभंबालान्तषट्पत्रकं।
कुक्ष्याभंमणिपूरकंदशदलंडाद्यैःफकारा
न्तकं पत्रैर्द्वादशभिस्त्वनांहतपुरंहैमंक
टाद्यन्तकं ५ मात्राभिःस्वरषोडशैर्दलयु
तंज्योतिर्विशुद्धात्मकं हंक्षेत्यक्षरपद्मप
त्रयुगलंरक्ताभमाज्ञापुरं तस्मादूर्ध्वग्रयो

मुखं विकसितं पद्मं सहस्रच्छदं नित्यान
न्दकारं सदाशिवमयं शक्तिं नमः श्रीगुरुं ६
आधारे लिङ्गनाभौ प्रकटितहृदये तालुमू
ले ललाटे द्वे पात्रे षोडशारे द्विदशादशादले।
द्वादशार्द्धे चतुष्के वासान्ते बालमध्ये डफक
तसहिते कण्ठदेशे स्वराणां हं क्षं तत्वार्थयु
क्तं सकलदलगतं वर्णरूपं नमामि ७ पू
र्वेद्युः सूर्योदयादारभ्य अद्यदिन सूर्योदय।
पर्यन्तं षट्शतोत्तर एकविंशत्सहस्रोच्छ्वास
निश्वासात्मिकं अजपा परब्रह्म गायत्री मूला।
धारस्वाधिष्ठान मणिपूरक अनाहत विशुद्धा
ज्ञा ब्रह्मरन्ध्रेषु स्थितेभ्यः गणपति ब्रह्मा वि
ष्णु रुद्र जीव परमात्मा गुरुभ्यो यथा यथाभा
गं जपं निवेदयामि षट्शतं गणेशाय स्य ष
ट्सहस्रं प्रजापतेः षट्सहस्रं महाविष्णोः ष
ट्सहस्रं परमात्मनः ८ गुरोरपि सहस्रं तु
सर्वकल्याणं भवेत् ९ वं नमः शं नमः षं
नमः सं नमः वं शं षं सं दलयुक्तं सम्पगाधार